या श्रान्ति-पूर्ण-विहिताःखलु तच्छ्रमस्य ।
शक्नोम्यवर्णनतया नहि वर्त्ति तुञ्च ॥ ११८७ ॥

एवंविधानि सहयोग-परिश्रमाणि ।
श्रेष्ठसुकार्य-निवहेषु परेतरेषु ॥
स्युश्चेन्निरस्यति समस्तक-मर्मबाधा ।
नोनूनमत्र खलु विद्यते एवशंका ॥ ११८८ ॥

या निर्मिता खलु जनै रुपयोगि-पद्या ।
ह्यत्रत्य-लोकनिवहस्य सुखाय च स्यात् ॥
मन्ये च वक्तुमपि पार्यत एव नूनं ।
कार्योपयोगि सरणिति वोभवीति ॥ ११८६ ॥

समारोह-विधायिभ्यो ह्येकत्राऽध्युषिताय च ॥
यथोचिता धन्यवादा विद्यन्ते निखिलाय च ॥ ११६० ॥

मार्ग-मार्गयतामग्रे ह्यग्रणी र्मार्गय न्नृपः ॥
आददे गिरमेवं हि "जय नेपाल" ‍िद्विदताम् ॥११६१

२०१३ विक्रमादित्य संवत्सरे फाल्गुन मासस्य १२ दिने पूर्व ४ संख्याक-भोजपुरे श्री ५ महाराजाऽधिराजेन देश-वासिभ्यो विश्राणितःसंदेशः— ॥ ११६२ ॥

सभापते ? देशप्रिया ? पितुश्च ।
स्वदेश-भक्तैक-परेतरेषाम् ॥
तपोनिरीहस्य फलात्मताया ।
माधारतायां जनतन्त्रकस्य ॥ ११६३ ॥

समूह-रूपे वय मद्य संगता ।
सयोगताऽऽत्मार्पणतोजनानाम् ॥
आसादितं तज्जनतन्त्रकंहि ।
विधाय सम्यग् बलिदान कर्म ॥ ११६४ ॥

एतस्य पुष्पाय फलाय कल्पनं ।
प्रत्येकशो नागरिकस्य कर्मच ॥

अस्माक मेवाऽखिल देशवासिनां ।
प्रन्यून मेवाऽखिल वस्तु साधनम ॥ ११९५ ॥

समेधनीयाऽखिल- शक्तिरित्थं ।
समुद्भवानां निज- देशकस्य ॥
आसां प्रवृद्धया खलु बर्द्धनं च ।
भविष्यतीत्थं जनता-हितस्य ॥ ११९६ ॥

अस्यैन हेतोःसमदेश- वासि ।
स्कंधे वसंसं च मिथो मिलित्वा ॥
स्वदेश-सेवाऽत्रसरो हिजातः ।
संकीर्णताऽस्मास्वपनोदनीया ॥ ११९७ ॥

एवं विधायैव स्वदेश मग्रे ।
नेतुं हि बिश्वेषु वयं च शक्नुमः ॥
आस्माक-देशस्यनिवासकेभ्यो ।
ह्याव्हान मेत खलु बिद्यते यत् ॥ ११९८ ॥

सर्बे स्वदेशस्य च देशवासिनां ।
भव्याय यद्यल्पश एव वाऽपि ॥
यच्छन्तु शक्यं सहयोग मेतन् ।
मन्ये स्वदेशोन्नय-मूल-मन्त्रम् ॥ ११५९ ॥

शेषे प्रभुःपशुपति रवता त्सभस्ताम् ।
सत्रा समूहित-जनाऽखिल-सङ्गतै र्में ॥
एकत्र सादर-समाश्रित-कार्य-भाग- ।
प्राप्तेभ्य एव वितरामि च धन्यवादान् ॥१२००॥

साधनोत्पादकोऽयोभि-र्नेपाल-वर्धनोन्मुखः ॥
नेपालेशो नरेन्द्रो नो, "जय नेपाल" व्याहरत् १२०१॥

२०१३ संवत्सरे वैक्रमे फाल्गुन मासस्य १३ दिने भोजपूराऽऽपणा दर्धकोश-दाक्षिणात्य-खिका साझा ट कूसार नाम्न्यापणे स्वागतस्य प्रत्युत्तरे श्री ५ महाराजाऽधिराजेन प्रदत्तं भाषम् मिदम्:— ॥ १२०२ ॥

प्रिया ? स्वदेशीय-निवासिनोऽद्यौ ।
तन्मण्डलस्योद्यम-केन्द्र-भूतकाऽऽ
पणे समागत्य स्वमेलनेनच ।
विनोद-भावेन समन्विताःस्म; ॥ १२०३ ॥
देशोन्नते रुद्यम एव पद्या ।
चेयं न वाच्याऽतिशयोक्ति रस्ति ॥
सर्वस्य क्षेमंकर चालिताभिं ।
र्यःस्वागतो नोऽिहिताऽऽदरोऽस्ति ॥ १२०४ ॥

एतस्मा जनता-कृताद्धि विषया ञ्जोऽव्यक्ति समानतः ।
लोकानां निवहस्य निर्मलमनो राष्ट्राऽनु राग स्तथा ॥
सत्यं नः सहयोग-युक्तकमनःसद्भावना चेतसि ।
ह्येत त्सर्वमहो ? चकारितनितरां विश्रम्भ पूर्णोऽस्तियत्
॥ १२०५ ॥

येसन्त्यत्र समूह-संगतियुता ह्येवंविधा स्तैःसमम् ।
चैकत्वाऽलघु भावनापरिचिता दीर्घं विशालंमनः ॥
तस्मिन् स्थेयसि देश-उज्ज्वल-तमानूनं भविष्योदय ।
इत्थं वक्तु मपीह पार्यत इदं सर्वा नत्रोचन्नृपः ॥ १२०६ ॥

स्थानीय-श्री·सिद्धिकालोन्नमन्तो ।
ह्येतद्धेतोःस्वागतस्याऽखिलस्य ॥
सम्पर्केण प्राप्तकेभ्यःसमेभ्यः ।
संयच्छामो हार्दिकान् धन्यवादान् ॥ १२०७ ॥
सिद्धिकाल्यादिकालीनां प्रपन्नःपद्यो नृपः ॥
चण्टेरम 'जयनेपाल" नेपाल-जन-भाग्यदः ॥१२०८॥

२०१३ विक्रम संबत्सरे फाल्गुनमासस्य १७ दिने, पाखरी वासे स्वागतायै कत्रितेभ्यो जन-समुदायेभ्यः श्री ५ महाराजाऽधिराजेन प्रभुणा प्रदत्तां भाषणमध स्तनम् ॥ १२०९ ॥

विद्याऽनुरक्ता निजदेशवासिनो ? ।
ह्यस्मिनदिनेऽमुष्यहिमण्डलस्य ॥
विद्यालयानां समुदीक्षणेन ।
एवं प्रकुर्म्मःपरिशीलनं मुदाम् ॥ १२०० ॥

विद्यैव लोकाऽखिललक्ष मुक्ते ।
रत्युक्तिरस्या न भविष्यतीति ॥
परं विनास्वाक्षरबोध मेव ।
विद्यान चाऽस्ति गृणनं न तथ्यम् ॥ १२११ ॥

कर्त्तव्यतायां च चरित्र-शस्ते ।
लीनत्वकं मुख्य-तदीय मङ्कम् ॥
तत्साद्र्ध मस्मिन च युगे परन्तु ।
ज्ञानं हि वर्णस्य परं विनिश्चितम् ॥ १२१२ ॥

विद्या-दानं सत्तमं दान माहु ।
विद्यै वाऽस्ति स्वंबलं रम्यरूपम् ॥
लोका आसन् येऽन्तरा सर्वकारं ।
सर्वै स्तैरन्येतरैःसर्वलोकैः ॥ १२१३ ॥

या या शक्ति स्ताम नुसृत्य नैजां ।
व्युत्पत्ति स्वां स्वाऽनुकूलां विधाय ॥
सम्यग् विद्या-सुप्रचारात् सयोगाद् ।
ऋते दाना दुज्झनंकालमेतत् ॥ १२१४ ॥

आस्ते वंहिष्ठोऽय मेव प्रमादो ।
प्रोक्तुं ह्येतत पार्यतेऽस्माभिरेवम् ॥
सर्वे सत्यं रक्षणाय क्षमेरन् ।
इत्थं हार्दो धन्यवादः सकामः ॥ १२१५ ॥

२०१३ विक्रम संवत्सरे फाल्गुन मासस्य १८ दिने

प्रधानमन्त्रिणा श्री टंकप्रसादाचार्येण कृत-योजनाऽऽयोग-स्योद्घाटनाऽवसरे श्री ५ महाराजाऽधिराजेन प्रेषितःसंदेश ॥ १२१६ ॥

आपादितुं किञ्चन कृत्यकं च ।
सुस्पष्ट मेवाऽनिरतं चतथ्यम् ॥
तथ्यांकनाऽऽधारित-योजनाया ।
नितान्त मावश्यकता समस्ति ॥ १२१७ ॥

किन्त्वस्म-त्कृतत्-योजना फलयतःप्रारणाऽर्पणाऽऽधारितात् ।
कार्योपेतद्धरस्वकीय-नियमं स्तद्योजनैकाङ्क्षकः ॥

एतत्सत्यनिषेवणेषु सुमनोभावा मनो-भावना ।
अत्यावश्यकता-समन्वितमा न्यूना नचाऽस्ति ध्रुवा
॥ १२१८ ॥

एतत् भावनयाऽधिकारसहिया स्वायोजनाऽऽयोगकाः ।
ते सर्वेऽप्यनुप्रेरिताहिच भविष्यन्तीहमे प्रत्ययः ॥
विश्रम्भेसतिनोऽधं पूर्णमनसाऽऽयोगस्य चोद्देश्यकं ।
स्यात्पूर्णं खलु कामये स्फुटयितुं सन्मङ्गल-प्रार्थनाम् १२१९

२०१[illegible] विक्रम संवत्सरे फाल्गुन मासस्य १८ दिने धनकुटायां राज-शिविरे श्री ५ महाराजाऽधिराजेन स्वस्वागत-हेतवे समवेतेभ्यो जन-समूहेभ्यःप्रदत्तं भाषणम् १२२०

हे देश-वासि-जनता ? ननु विश्रुताऽऽख्ये ।
अस्मिन् स्थले धनकुटेति च सर्व-पूर्वम ॥
हृद्याऽस्मदीय-निजदेश निवासिभिश्च ।
संमेलन-स्मरणकं भविता सदैव ॥ १२२१ ॥
इति नो हृदयस्य भावना ।
ननु देशो हि समुन्नता वधः ॥
[illegible] वत नोऽस्ति सजोषसाहसो ।
हृदि हर्षोऽपि प्रपद्यते परः ॥ १२२२ ॥
आनेयेयं केवलं सुव्यवस्था ।
तस्या स्ताहक् साधनाऽन्यूनताऽस्ति ॥
तल्लब्धानां सूपयोगेषु सत्सु ।
साफल्यंने देश-सर्वोन्नतिश्च ॥ १२२३ ॥

[illegible] शतिम् बोधक

इत्थं वाच्यं ज्ञातमेवं समस्तै ।
रेतद्धेतोसेवनीयस्त्व देशः ॥
स्वार्थ-त्यागा दैकमत्येन सश्चे- ।
त्कूटं प्राप्तुं ह्युन्नते स्त्वर्यतेहि ॥ १२२३ ॥

इति विश्वसनं प्रपद्यते ।
सम-मेलात् सहयोग-दानतः ॥
निज-देश-परिस्थिति-क्रिया ।
प्रतिपद्योन्नयतां सम-प्रजा ॥ १२२४ ॥

इत्थं कथानां धृतधारणा समें ।
श्रीसर्वकारीय-जनास्तथाऽन्ये- ॥
देशस्य भक्ताःखलु कर्मचारिणः ।
कर्त्तव्यतायां निवसन्तु सर्वे ॥ १२२५ ॥

धर्मेण साकं जनता-स्वदेशयोः ।
सेवा विधेयाऽस्ति जनैः समस्तैः ॥
अन्ते समस्ताय समूहिताथ ।
च धन्यवादं वितरन् जनेभ्यः ॥ १२२६ ॥

सर्व-प्रजानां भविकाय चाऽर्थये ।
सदा शिवं तं पशुपं महेशम् ॥
इत्थं समुक्त्वा नृपति र्महेन्द्रो ।
"जयेति नेपाल" उदब्रवीत्सः ॥ १२२७ ॥

२०१३ बिक्रम हायने फाल्गुन मासस्य १६ दिने धनकुटा-महाविद्यालय- (इन्टरकलेज) भवनस्यो द्धाटनस्य पश्चात् धनकुटा-निवासिभिरायोजित-स्वागत-समारोहे श्री ५ महाराजाऽधिराजेन प्रदत्तः संदेशः— ॥१२२८॥

प्रत्येक मभ्युन्नति-मूल-शिक्षा- ।
स-सत्य मङ्गी करणं विधाय ॥
एतत्प्रदेशीय-जनोद्यमेन ।
श्री सर्वकार-प्रजयोः सयोगात् ॥ १२२९ ॥

विद्यालयस्य बृहतोऽस्य नूतना ।
ऽऽगारस्य ह्युद्धाटनजात-कर्मतः ॥
अस्माकमेवं हि प्रसन्नचेतसां ।
प्रपद्यमानाऽस्ति प्रशस्तताऽतनु ॥ १२३० ॥

भवन्ति छात्राःकिल नैज-देशे ।
भविष्य दाशाऽऽस्तिहि छात्र-काले ॥
स्व-जीवने शिक्षण मेव कार्यं ।
शिक्षां प्रकुर्म्म इति प्रत्ययोऽस्ति ॥ १२३१ ॥

कर्माऽधिकाराःखलु शिक्षकाश्च ।
स्वराष्ट्रियत्वं, निज-देश-सेवा- ॥
विनम्र-भावादि-गुणान् समस्ता ।
न्छात्रेभ्य एष्यन्ति फलंदिशन्तः ॥ १२३२ ॥

विद्या-महत्वं सकलं विदित्वा ।
स्वकीय-कर्त्तव्य मनुस्मरन्तः ॥

विद्या-प्रचाराज्जनता: स्वदेशाऽऽ।
सेवाच्युतानो भवितार इत्थम् ॥ १२३३ ॥
अस्माक मेषा खलु धारणा यद्।
विज्ञान-संपन्नक-वोधतायाः ॥
निषेवणेनैव मनुष्य—कालं ।
संपाद्यते चैव स-सारकत्वम् ॥ १२३४ ॥

एतत् तथ्यक-संप्रमाणित कृते सर्वे वयं शक्नुमः।
इत्थं नोहि प्रपद्यते स्व-मनसां हार्दाऽखिला भावना॥
विद्याप्रेमसुसंगतान्हि सुजनाञ् छेषे च विशिष्यतः।
एतत्कर्म परायणान् प्रति जन न्नो धन्यवादोऽस्तिनः ॥१२३५॥

स विज्ञान-ज्ञान भूपो विज्ञान-सरणिं नयन् ॥
उन्नय न्नैजकं देशं "जय नेपाल" उक्तवान् ॥१२३६॥

२०१३ संवत्सरे फाल्गुन मासस्य १६ गते धनकुटाया गोकुण्डेश्वर-प्रधान विद्यालयस्य राजत-जयन्ती-महोत्सवसमारोह उक्तविद्यालयाय तथा धनकुटा वालिकाप्रधानपाठशालायै श्री ५ महाराजाऽधिराजेन प्रदत्तः संदेशः— ॥ १२३७ ॥

हे विद्या प्रेमिणो ? यल्ललित-धनकुटा ख्यापितायां नगर्यां
शिक्षाचञ्चूर्यमाण-प्रसृमर रसनाऽऽदर्शना ज्जातमुन्नः ॥
एतद्विद्यालयेन शरयुगलमितं वर्षपर्यन्तमेवं ।
देशानांमण्डलस्याऽनवरतविहिताऽशुल्क सेवा-समर्थें १२३८
प्राप्ते त च्चालकान्नःप्रति च गुरुवराञ्छात्रका न्ततसहायान्।
आस्माकीनःसहर्षो हृदय-विहितकःपद्यते धन्यवादः ॥

एवं कृत्वा तथाऽन्येष्वपि तत्तसेशिविरे शैक्षिके कर्मवीरं ।
कुर्वीरन् स्वीयसिद्धं निज-मनसि गताऽऽकारभाऽऽ
विद्यतेनः ॥ १२३६ ॥

एतद् विद्यालये-नाऽखिल-वलम शक्ति मानितुं तां जयन्तीं,
तस्मा त्सम्यक्तयाऽथो कनकमय जयन्तीं तथाऽन्यां
जयन्तीम् ॥

संमान्य द्वे सदाऽतो बहुविध जनता सेवितुं स्वंच राष्ट्रं ।
शक्नोतु स्पष्टये हृद्‌हृदय-प्रतिगतां प्रार्थनां कामनाञ्च ॥ २४०॥
वर्धिन्या मात्रया नः प्रथित-धनकुटा-वालिकानां च विधाऽऽ
गार-स्त्रो रत्न-भूषास्थिति-सुख-सुभगै राष्ट्र-सेवाऽर्पणाय ॥
साफल्यं प्राप्स्यतेहेति च मनसिगता कामना मङ्गलस्य ।
एतत्साहाय्यकेभ्यो मम मनसि गतं धन्यवादं दिशामि
॥ १२४१ ॥

भाग्यवद्-भूमि-नेपाल-सौभाग्य-श्री-विवर्धने ।
जागरुकोहि "नेपाल ? जय" चेत्थं नृपोऽवदत् ॥१२४२॥

२०१३ विक्रम संवत्सरे फाल्गुनमासस्य २८ दिने
श्री ५ महाराजाऽधिराजेन पौरस्त्य-पर्वतस्य भ्रमणे स्वतो
ऽनुभूत-विषयेषु जनता-नाम्नि प्रदत्तो राजकीयः संदेशः १२४३

आदौ प्रिया हे जनता ? यथार्ह, ।
वाहीक-देशेषु ह्यु पत्यकायाः ॥
विभिन्न-भागेहिस्वतश्च गत्वा ।
यावत् प्रदत्तं समयेन यावत् ॥ १२४४ ॥

तत्रत्य-देशं जनता-दशां च ।
यथा प्रकारेण ससंभवेन ॥
दृग्-गोचरीकृत्य सकर्ण-गोचरं ।
निध्याय बुद्ध्या मनसा नियम्य ॥ १२४५ ॥

मया समासादितकाऽनुभूतौ ।
द्विशब्द मेवं च चतुष्क-शब्दम् ॥
संचिन्नयामो गदनं च सम्यक् ।
स्वकीय-कर्त्तव्य-विधेय मेनत् ॥ १२४६ ॥

श्रेष्ठो ह्य वयुगो जनोदय युगः श्री सर्वकारस्य च ।
संपर्कं विरचय्य नोजनतया सम्यक्तया सुन्दरम् ॥
यद्यत्सद्धि हितं च कार्यकमथो नो सवकारस्य च ।
पूर्णं नोभवतीद मल्पक तरं तद्भाषितुं पार्यते ॥१२४७॥

कस्मिन् हि सद्मनि सदस्य उपेक्षित श्चेद् ।
हेतोश्च तस्य सदनस्य न भद्रता स्यात् ॥
तत्सत्य मस्ति कथनं ननु यस्य कस्य ।
चिद्देशकस्य च सदानितरां निमित्तम् ॥ १२४८ ॥

अब्देऽस्मिन-खलु युग्मकस्य तथा मासस्य वेदस्य च ।
मध्ये देश-वसिन्नके ह्यथ पुरस्थे शतदेशादिषु ॥
तत्रत्याऽखिल वस्तुनःस्थितिगतीर्ज्ञातुं तितिक्षा कृता ।
तस्माद् राष्ट्र दिशाकृते कृति-चये नूनं भविष्योज्ज्वलः १२४९

अस्माकं हि प्रपद्यते च नितरा मित्थं स्वविश्रम्भता ।
अस्माकं जनता- स्वकीय-हृदयो नो कच्चरो विद्यते ॥

राष्ट्रं प्रत्यनु राग-युक्त-जनता विन्दन्ति राष्ट्रैकतां ।
शिक्षायै नु बुभुक्षवःस्व-जनताःसर्वाःप्रयत्नै र्युताः॥१२५०॥

केवलं च जनतन्त्र-भक्तकैः ।
सेवनैव जनतन्त्र-शक्तिता- ॥
मूलमस्ति हि तदीय-सत्यता ।
तत्क्रियासु नयनं सुनिश्चितम् ॥ १२५१ ॥

स्वतो गत-स्थान-विभिन्न-जाते ।
र्भषा स्ववेषाऽखिल-रीतिका या ॥
ज्ञा[illegible]ा च सैद्धान्तिक-लोकतन्त्रा ।
ऽनुरुपदेशस्य हि तस्य हेतवे ॥ १२५२ ॥

तत्तद्विभिन्नाऽखिल-वेष-संस्कृति- ।
स्थिति-प्रणाली-सकलाऽभिरक्षणे ॥
अत्यन्त मावश्यकता विलोकये ।
यथा भवेन्नो हि तदीय-दुःखता ॥ १२५३ ॥

स्थाने स्थाने देश-सेवाऽनुरक्तैः ।
सम्यग् दत्ता नः समक्षं विचाराः ॥
सत्राऽस्माभि र्यान-सन्मण्डलीय- ।
शिक्षाऽध्यक्षान्नः समालोकनाच्च ॥ १२५४ ॥

तत्त्वान्येवं सत्परीक्षाऽऽश्रिताच्च
देशेऽस्मिन्नो देश-निर्माणकानि ॥
वेविद्यन्ते प्रकृतेःसाधनानि ।
कोषाऽऽगार श्चारुताया ममूल्यः ॥ १२५५ ॥

आस्मकीना धारणेयं गभीरा ।
ह्येकं सर्वा ज्ञातवृत्ता भवन्ति ॥

नम्रां सेवा-वैजयन्तीं गृहीत्वा।
सत्याद् हार्दात् सुप्त-गुप्त-स्व-शक्तीः ॥१२५६॥

स्फायन्तो येऽवश्य मावश्यकीया ।
कर्म-क्षेत्रे ये तपस्यन्ति लोकाः॥
तेषां पूर्णाऽऽवश्यको विद्यतेनो ।
निर्दोषोऽस्ति स्व-प्रजौघोऽस्ति वीरः ॥ १२५७ ॥

आस्माकीना पर्वतीय-स्थितीनाम् ।
वासा ज्ज्ञानाल् लब्ध-बोधाऽनुभूतिः ॥
संवर्द्धिणोः क्रान्तिकस्य प्रदानं ।
कुर्वन्नास्ते स्वं मनो-भावनायै ॥ १२५८ ॥

प्रत्येक-सुष्ठु-स्थिति-युक्त-सद्मनि ।
परस्पराणां च सहाय-सेवना- ॥
भावौ चकास्तः खलु देश एकको ।
विशालता व न्निलयेन तुल्यकः ॥ १२५९ ॥

अथवा

प्रत्येकाणां सुव्यवस्थ गृहेषु ।
सेवा भावो व्यञ्जते द्योतते च ॥
श्रित्वाऽन्योऽन्यं सत्सहायो व्यनक्ति ॥
देश स्तुल्यो बृंहदेक-गृहेण ॥ १२६० ॥

देशस्यैव विभिन्न-भाग-बहवो ह्येक-गृहस्थस्य च ।
तुल्या स्तत्परिवारकेण हि गिरे श्चोपत्यकाऽऽद्यं शके ॥

सेवा-भाव-सहाय-भावन-युता मेवं विधां दीपनां ।
देशस्याऽखिल-भावुकाय नितरां ध्यायामि
चाऽऽवश्यकम् ॥ १२६१ ॥

अस्माभिःप्रतियात-देश-निवहेतत्रत्य-लोकै स्तथा ।
भिन्नै धर्मिक-राज नीति-विशदैःसामाजिकैःशिक्षकैः ॥
संस्थाभिश्च प्रदर्शिता सुखमहो सद्भावना हार्दिकी ।
तद्धे तो निखिलाय नोऽस्ति हि यथार्हो धन्यवादो मम १२६२

भावना सा सच जोष उद्यमः ।
चित्रीयमाणाऽखिल-राष्ट्र-कर्म्मसु ॥
दृष्टेषु तेषु प्रगते हिं मात्रया ।
परं प्रकृत्या भविता प्रतुष्टिः ॥ १२६३ ॥

आप्राणं येनदत्तं जनसमुदयतो देशलोक-द्वयार्थे ।
कारागारीय-दुःखं बहुल कठिनकं येन भुक्तंसमस्तम् ॥
सर्वस्वं येन हातं सकल--परतराऽऽदर्शक-प्रेरणाऽऽपि ।
ह्यारूयातेश्चाऽनुसारं निजमितविहिता कर्म्म-चर्य्या
सपर्य्या ॥ १२६४ ॥

लाभानां लिप्सयाऽथो द्रुततर मनसोनैव कृत्वा प्रवृत्ति ।
मेवं शक्ता भवेम ह्यधिमहि सकला राष्ट्र-धर्माऽवनाय ॥
अस्माकं प्रार्थनेत्थं प्रभवति मनसा ह्येव संपद्यते च ।
अस्मिन् देशस्य भव्यं भवति च भविके भावुकं नः
समेषाम ॥ १२६५ ॥

अस्माक मासु पुरतस्तदाई शैलीय-यात्रासु समागतेभ्यः ॥
सम्बन्धितेभ्यःसहयोगवद्भ्यो ददमोवयं हार्दिक-
धन्यवादम् ॥ ॥

आसन्ने समये वयं भगवति श्रीकुम्भ-राशौरवौ ।
ऊनत्रिंशमिते तदीय-दिवसे केषाञ्चिदन्हां कृते ॥
लंकाधीश-निमन्त्रणाऽर्थकमथो लंकासयिष्यामहे ।
एतन्नो भ्रमणं च मङ्गलमयीभिःकामनाभि र्भवेत ॥१२६६॥

अस्माकं ननु देश-वासि जनता-निर्माण-कार्येऽखिले ।
ह्यास्माकीनमिदं परिभ्रमणकं संमित्र-भावाऽन्वितम् ॥
संपद्ये त हि तस्य कारक इति ह्य स्माभि राशा कृता ।
इत्येवं जनता प्रति नृपवरो दत्ते स्मसंदेशमम् ॥१२६७॥

स्वतीऽनुभव-पूतात्मा पूर्वशैलाऽटने न हि ॥
फलव त्कर्म मर्मज्ञो "जय नेपाल" चदिवान् ॥१२६८॥

२०१३ विक्रम संवत्सरे फाल्गुनमासस्य २६ दिने

न्यूजिल्याण्ड तथा नेपाल-सर्वकार-संयुक्त-सहयोगेन निर्मीय माण दुग्ध-शालायाःशिलान्यासं बिदधता श्री ५ महाराजाऽधिराजेन प्रदत्तं भाषणम्

न्यूजिल्यान्डक-देश-युक्त-वशतः श्रीसर्वकारस्य च ।
नेपालस्य सहाय-कार्यवशतो निर्मीयमाणस्य च ॥
दुग्धस्याऽखिल-मन्दिरस्य च शिला-न्यासस्य संपादने ।
ह्यो तस्मिन् दिवसे प्रमोद मतुलं संपद्यतेऽस्मासु हि ॥१२६९॥

नेपाल एकश्च कृषि-प्रधानो गो-सेवनाऽङ्गं कृषिकर्मणोहि ॥
वंशाऽनुजातं भजनं गवां च कर्त्तव्य मास्माकपरं -प्रपद्यते
॥ १२७० ॥

धेनूनां भजन-कृतौ च पयसा मुत्पादने कर्मणि ।
सर्वै र्देश-निवासिभिश्च मिलितै र्देशस्य संसेवनम् ॥
एतल्लोक-कदम्बकस्य च परं कर्त्तव्य मात्रं न च ।
देशीय-सुकृतञ्च स्वीयक मिदं लब्धावऽबोधा वयम्
॥ १२७१ ॥

तत्राऽपि प्रगुण-स्वकीय-रचना-कार्यैक-पक्षाऽग्रतो ।
गन्तुं ह्यु मिषताऽथ पौष्टिक-पदार्थस्याऽपि दुग्धस्य च ॥
श्रेष्ठो त्पादन कमर्णे यदि च चेद् देशेन तत्रोद्यते ।
स्वस्थो लोक-बलो भवे त्कति तदा तत्कार्य मापादयन्
॥ १२७२ ॥

सोऽयं कथा-विषयको विदितः सकलेन हि ॥
अज्ञात-विषयो नैवं सर्वैःसंपद्यते खलु ॥ १२७३ ॥

यद् धेतोस्तु बशेन ह्यस्तु नितरामस्मा कमस्मत्कृतेः ।
मुख्ये सद् व्यवसायके परमथो क्षीरस्य संपादने ॥
प्रत्यग्भावग-देश एव तदपि नः पूर्वजै रुन्मिषत् ।
पद्या या च निदर्शिता प्रगतितोधे नोश्च शुश्रूषया ॥१२७४

सत्तस्यां प्रगतौ पराऽऽनयनतो वैज्ञानिकीं जागृति ।
अस्माकंकृषकाःप्रयान्तु नितरा माबाल-वृद्धादये ॥
आवश्याऽधिक-संप्रपूर्ण-गुणिनां दुग्धादिकानां तथा ।
तत्संबन्धित-वस्तु वर्धितुमथो शाला भृशं तत्परा १२७५

एषा वैज्ञानिकी शाला-पक्षः परिधि मेधयेत् ।
एतत् क्षमेत नयितुञ्जने साधारणेऽखिले ॥ ॥

नाथाऽन्तं श्रीपशुपतिं प्रति मे हार्द-प्रार्थना ॥
महीन्द्रो नोवचः शेषे "जय नेपाल" ऊचिवान् ॥१२७६॥
बृंहण-द्रव्य-प्रसरा न्नेपाल-जन-बृंहणे ॥
सर्व्वथा सर्वदो ह्युक्त-नृपस्येदं स्वभाषणम ॥ १२७७ ॥

२०१३ विक्रम संवत्सरे फाल्गुनमासस्य २६ दिने राजधान्यां टुँडीखेल प्रदेश-पुरो नवीन-डिजेलशक्ति-गृह-मुद्घाटयता श्री ५ महाराजाऽधिराजेन प्रदत्तं भाषणम् १२७८
महिला ? सज्जनवर्गा ? डिजेल शक्त्यु [illegible]वे जाते ॥
हर्षेण मद्याऽस्माकं निसर्गतोलब्ध मेवास्ते ॥ १२७६ ॥
उपत्यका-प्राप्त-नडि त्प्रकाश न्यूनत्व पूर्त्ति र्भविता ह्यनेन ॥
यद्यप्यनन्यं हि हिमाल-कत्ता-पानीय-भण्डारकमस्त्यपीह १२८०
आनीय विख्यात-डिजेल मेतद्गतेस्तत श्चालन मेव कर्म्म ॥
आस्माक-देश-प्रतिकूल मेतन्नि तान्त मेवं ह्यत्रलोक्यते च १२८१

तथाप्यनर्हं नहि, तद्धिग सद्यः ।
संकष्ट-कालीन-प्रवन्ध आश्रितः ॥
द्राग्देश-लब्धैःप्रकृति-प्रसाधनै ।
स्तत्सर्वकारो हि प्रवन्धयिष्यति ॥ १२८२ ॥
श्रीसर्वकारैःकिल प्रस्तुतासु ।
विभिन्न-कत्तात्मक-योजनासु ॥
सतीषु सम्यक् फलितासु विद्युतो ।
न-भावतां नङ्क्ष्यति पूर्णमात्रया ॥ १२८३ ॥
वैज्ञानिकस्याऽस्य युगस्य विद्युत् ।
नूनं कथैका महती समस्ति ॥

व्याहर्त्तु-मित्थं ननु पार्यते च।
सभ्यत्व मत्राऽखिलनिर्भरं हि ॥ १२८४ ॥
एतर्हि कालेऽखिल माविरस्ति ।
यावच्च साहाय्य-वशाद्धि तेषाम् ॥
नाऽऽपद्यतेऽस्मादधिकोक्ति रेवं ।
तडित्समुद्योग-विकास-मूलम् ॥ १२८५ ॥
मत्वा महत्वं किल विद्युदौजसां।
सस्वीकार जनता-सयोगात् ॥
देशोन्नयन्तः सकला स्तनुं मनो।
वसूनि योक्ष्यन्ति च प्रत्ययो दृढः॥ १२८६ ॥
संपर्कितेभ्योऽन्तिक-संस्थितेभ्यः ।
शेषे समेभ्यो वितरामि हार्दम् ॥
सद् धन्यवादं किलभूभुगीशो ।
चष्टे स्म "नेपाल जयेति"भूपः ॥ १२८७ ॥

२०१३ संवत्सरे फाल्गुन मासस्य ३० दिने महा-महिम-प्रशासक-रथिन् ? महिला स्तथा सज्जन बृन्द ?

लंकांयः रत्नमालम-व्योमयानाऽधिकरणे प्राप्ते सति स्वागत-समारोहे श्री ५ महाराजाऽधिराजेन प्रदत्तं भाषणम्:- १२८८

अस्मिन् हि वारे भगवज्जयन्त्याः ।
शुभोपलब्धे सुगतेश्वरस्य ॥
समागमेनाऽतिरां प्रजाता ।
देशे मनस्थाऽतिशया मुदाऽस्ति ॥ १२८९ ॥

भुवत्सकाशा द्विहितं स्वमैत्रि- ।
पूर्णाऽखिल-स्वागतकस्य सेऽत्र ॥
निमित्ततायां भवतःसमस्तं ।
हृद्-धन्यवादं किल बोधयामः ॥ १२६० ॥

दृष्टेर्वर्त्माऽनुसारं धरणिमनु गते गोलकस्याऽस्मदीया।
वाराह्नो वर्त्तमानौ तदपि च युगला वेसियाद्वीपदेशे ॥
लंका नेपालदेशौ चिर तर-समया त्स्वेनि [illegible]सानुबन्धान् ।
मित्रत्वाभ्यां समेतौ सुचिर-परिचितौ वर्त्तो ह्येवमेतौ
॥ १२६१ ॥

नेपाले जातकानां सुगत-भगवतां जात-संदेशकाम्नो ।
लंका-देश-प्रजाभि रमर-सु-वचनै र्मान्यतांसंप्रदाय ॥
एतद्रूपे महत्वे तदुदित उररीकार एवं विचारे ।
सौहार्दं ह्येनयोर्नःपरिचय-भरितं ह्ये तदेवं घनिष्ठम् १२६२

एतद्-द्विदेशीय प्रजान्तराऽऽश्रय ।
त्संबन्ध-दाढर्यै निज-संस्कृतैःसह ॥
परस्पराऽऽसक्त स्वामित्र-भावनां ।
समेधमानां च लभामहे वयम् ॥ ॥ १२६३ ॥

समं भगवतो महा पुरुष-बुद्धदेवस्य नो ।
महन्निज-विदेशतो चसमवाप्त-सत्प्रेरणाः ॥
मिथस्कृत-सहयोगाः स्वसन्निताच वर्धिष्णवः ।
भवन्त्य तुल मुत्सुकाः समवलोकिताःसम्प्रति १२६४

इदमस्ति शुभस्य चिन्हितं ह्यधुना विश्व-निमित्तकं सदा ।
सुख-शान्ति-भविष्य-द्योतकं हृदये वर्त्तत एव धारणा १२६५

नेपाल-लोक-निकुरम्ब-सकाशतश्च ।
अस्माक मद्य च वर्ग्यं किल सर्वकारात् ॥
सद्-भावनाऽऽश्रित-समीहनया सहैव ।
लङ्का-समस्त-जनता प्रतिह्याःगताःस्म ॥१२६६॥

अस्माद्दिनो अमणतः सुचिराय कालात् ।
सम्पर्कितां परतरां घटयेद् घनाञ्च ॥
एवं [illegible]योः खलु परस्पर-मेलनेनाऽऽ ।
दान-प्रदान-सखिताऽतिशया ह्युपेयात् ॥ १२६७ ॥

आशाऽस्माकं भूप मणि रितीरयित्वा महीपालः ॥
"जय श्रीलङ्का" "नेपाल ! जय" हीत्थ मवोच तस्भक्ति कोद्गारम् ॥ १२६८ ॥

२०१३ विक्रम संवत्सरे फाल्गुन ३० दिने कोलंवो-नगर-पालिकासभया विहित-स्वागत-समारंहस्य प्रत्युत्तरे श्री ५ महाराजाऽधिराजेन प्रदत्तं भाषणम्:–॥१२६९॥

सभापति-महोदया ? प्रमहिलाश्च सद् वृन्दकाः ? ।
भवद्भिर्हित मीदृशं ननु मदीय-सुस्वागतम् ॥
तदीयक-निमित्तकं वयमथो भवद्भयोऽधुना ।
वयं नु विदधीमहि धनिकवादकस्याऽर्पणाम् ॥ १३०० ॥

नेपालीय-जनार्थ-ज्ञातक मदो जानीमहे स्वागतम ।
हार्द-स्वागत कर्मणाऽतिशयिता या दर्शिता मित्रता ॥
तस्मान्नोजनता-स्वदेश मुपरिं स्वामित्र-संमानता ।
कीदृक्षा भवतीति भावनतया जाज्ञ-प्रभावा वयम् ॥१३०१॥

अत्रान्तरा च भवतः किल नः स्वदेशात् ।
संमानता-सहित-हार्द-शुभेच्छितां च ॥
संगृह्य नैज-करयो र्हि समागताःस्मः ।
शान्त्यै सयत्न-नय पालक एव पूर्वात् ॥ १३०२ ॥

नेपालश्शान्तिरागःशमन-सखितयो श्चेतिहासाऽनुबन्धं ।
पारम्पर्याऽऽगतत्वाद् दधद्पि तदीदं स्वीय-सिद्धान्त सिद्धम् ॥
त च्छान्तौ लग्न शालि-दृढतर विदधन्निश्च प्रश्चंगतं नः ।
साऽऽस्तित्वं शान्तपूर्णं प्रकृतिकर पुटं [illegible]शीलस्य
तत्वम् ॥ १३०३ ॥

विश्रम्भो विश्वतेय त्प्रकृति-बिलसता सर्वसिद्धान्तकेन ।
आशा सद्भावनाभि रविरल मिलितै र्विश्वदेशैःसमेतम् ॥
संबधं मित्रताया स्तदनु च भविता विश्व शान्तेश्च वृद्धिः ।
संबन्धो ह्य नयोर्वै चिरतर-समया त्स्वेति हासस्य पूर्वात्
॥ १३०३ ॥

प्राचीनाऽन्न श्चकालात्परिचयविलसज्जात-संबन्ध वाचां ।
सर्व प्रामाणितं यद् वहुल-समयतो मित्र संवन्ध बृत्तेः ॥
एकं जात स्वच्छ ताऽब्दा द्विकसित सखितायाःपरिच्छेद मात्रं ।
द्व्यब्दो पेता त्सहस्रात् सुगत-भगवतो दैव-संदेश-रम्यम्
॥ १३०४ ॥

एतद् द्वीपप्रजानां परिचित सभव द्येन सिद्धान्तकेन ।
मध्ये देश-द्वयस्याति शय-सखिता स्थापिताऽस्ति प्रमाणात् ॥
लंकायाःसर्वकारा ज्जनसमुदय वशातो राज्य-कालाऽभिषेक ।
आयातो भाममाप्तुं ह्य चिन सहितको श्रीमहाबोजिरत्नः१३०५

तेनैव नोदेशद्वयान्तरालश्रितद्वि संवध-सखित्व-दाढर्यम् ॥
कस्माच्चिदब्दा दन एव देशयोःश्रीसर्वकाराच्चतदन्यथा वशात्
॥ १३०६ ॥

एनेन देश-द्वय मन्तरा वृहत्- ।
स्वमित्रता नः परमा हिताऽन्विता ॥
अतोऽधिकं चारुतरेण मेलनं ।
संपद्यमानं वरिवर्त्ति नो मिथः ॥ १३०७ ॥

इत्थं च निश्चप्रचमेव मेव ।
मेशीयक-द्वीप-समस्त-राष्ट्रे ॥
संवर्ध्यमानासु च मित्रतायाः ।
सद्भावनासु प्रमुदा प्रजाता ॥ १३०८ ॥

एवं विधस्य स्वय मेकता च ।
परस्परेणा ऽ खिन्न-मेलनञ्च ॥
भवेन सर्वेण सहैव जायता ।
मित्यस्मदीया हृदयस्य कामना ॥ १३०९ ॥

वयं स्वदेश-प्रगते र्यथास्यात् ।
कुर्वन्त एवं च निजस्य यत्नम् ॥
त्वावश्य मेवाऽस्ति मिथःसयोगं ।
विचारताऽऽदान-प्रदानकानाम् ॥ १३१० ॥

बुद्ध-श्रीभगवद्भिर्धैकमहतां विश्व-प्रशिक्षावतां ।
पद्मा-साम-स्वमित्रताऽनुसरणा यूयं महाजातयः ॥
शान्ति-स्थापन-सदृशक्कृति-विधौ नोविद्यते हेतुकं ।
विश्वस्यैव समस्यया मतवहो वैभिन्न्य-संपादनम् १३११

एतादृक्षम-लक्ष्म-लब्धि-कृतये शक्त्या च यत्प्रार्यते ।
कर्त्तुं तत्सबल एव कार्य-करणेऽस्माकं मतैक्यं खलु ॥
लंकाया रुचिरत्नकेन जनताभिर्नःकृता त्स्वागताद् ।
धार्दोत्साऽतिशया प्रभावितममा नूनं प्रजाता वयम् १३१२

अस्माकं शुभ कामनाऽस्ति भवतां देश-कृते सर्वदा ।
सर्व्वाङ्गीण-विकास-कर्म्म-निखिलं चर्कर्त्ति देशो हि यः ॥
तेनैवं सखिभिःकृतप्रगतये गर्वायमाना वयं ॥
सारांशे ह्यसकृत्सकृत् प्रकटये नः स्वागते ज्ञताम् ॥१३१३
आस्माकीनः प्राणः प्रजार्थ-सुखहेतु-स्वधृत-प्राणः ।
"जय श्रीलंका" "नेपाल जय" हीत्थ मवो च न्महीन्द्रोऽन्ते
॥ १३१४ ॥

२०१३ विक्रम संवत्सरे मीनार्के १ दिने क्यान्डि नगर-पालिकायाः सभापतिना समर्पित-संमान पत्रस्य प्रत्युत्तरे श्री ५ महाराजाऽधिराजेन प्रदत्तं भाषणम:-
॥ १३१५ ॥

सभापतिक मेयराः ? खलु महोदयाः ? सख्रियः ।
तथा सुजन संघकाः ? रुचिर-क्यान्डि नाम्नः पुरः ॥
ममेह विहिताऽऽदरार्थक-समस्त-भव्योत्सवे ।
वयं च ननु बोधये नगर-पालिकान् धन्यकान् ॥ १३१६ ॥

नेपालकीयांऽखिल-सर्वकारान्ने ।
पाल-लोकाऽखिल-संहतेश्च ॥
अस्मिन् क्षणे वः प्रति नःशुभैषणा ।
सखित्व-पूर्णाऽखिल-भावनायाः ॥ १३१७ ॥

संव्यञ्जनेऽस्माक मतीव हर्षो ।
नेपाल-नेपाल-जनान् कृतायाः ॥
सद्भावनायाश्च सभेश्वरेण ।
वयं प्रकुर्म्मो बहुलां समादृतिम् ॥ १३१८ ॥

आस्माक-देशद्वय मस्ति दूरे ।
भूगोल-दृष्टयातदपि प्रकामम् ॥
स्वीयैति हासाऽऽस्पद-मित्रताभिः ।
सुपूर्णसंवंध-पुरातनोऽस्ति ॥ १३१९ ॥

प्राचीनाऽवसरान्मिथःपरिचया न्नोदेश-युग्मस्य च ।
संवन्धाऽखिल-मित्रता-समयतो राज्ञां च नीते र्वशात् ।
नैकस्मिन् परिवर्त्तनेऽपिहि परिस्थित्या रमुष्या वशात् ।
विश्व-भ्रातृ-शमादिक-प्रगुण तः सैद्धान्तिक-श्रेष्ठतः
॥ १३२० ॥

दार्ढ्येण ग्रथिते कदाचिदपिनो संवन्धता नोच्छिदत् ।
आस्माकीन-परस्परैक-मिलने ह्येवं च संवर्धिते ॥
मित्रत्वेऽखिल-वर्धने च सति नो जाताऽतिरेको मुदा ।
कालादस्ति चिरा द्वि-देश-जनता-मित्रत्व-संवंधकम् १३२१

अस्मान्नो भविता भविष्यति परो विश्वास एवं दृढो ।
विश्वेऽद्यापि महात्म बुद्धक-विभो रन्येत रेषां बचः ॥
शान्ते विंश्वक-वन्धुताऽमर-वचोमान्यत्वसं दायिनाम् ।
देशानां हि प्रपद्यतेऽखिलमिदं कर्त्तव्यताकं च यत् १३२२

न्यूना न्न्यूनतमं प्रयत्न मखिलं शान्त्यै विदध्यु र्जनाः ।
सर्वे स्वीय-बलाऽनुसार-करणा द्धेतोःसखित्वान्मिथः ॥

आस्माकीन-विवेचनेऽद्यलघवो राष्ट्रा महान्तो भवे ।
लोक-व्यूह-समृद्धि-विश्व-शमन-स्थैर्यैं भवेयुःपराः १३२३
एतच्चारु पुरंक्याण्डि दृष्ट्वा देशं स्वतो ऽयहम् ॥
देशस्योन्नयने जाते हृष्यामस्तत्र रया वयम् ॥१३२४॥

भूयादजस्रं भवतां समुन्नति ।
लंकाऽभिधो ह्येष महान् स्वदेशः ॥
समृद्धि-शीलोहि भवेद्धिपूर्णं ।
इत्यस्मदीयाऽस्ति शुभाऽऽत्रहेच्छा ॥ १३२५ ॥
"जयेति नेपाल जयेति लंका" ।
श्रीमान् महेन्द्रो ह्यवने महेन्द्रः ॥
समर्पितायां निजमान-पत्र्यां ।
तदुत्तरे व्याहरतिस्म भूपः ॥ १३२६ ॥

२०१३ विक्रम संवत्सरे चैत्र मासस्य ३ दिने

लंकायां बुद्धजयन्त्यां लोक सभाया मुरायनीकृत मानपत्र स्य प्रत्युत्तरे श्री ५ महाराजाऽधिराजेन प्रदत्तं भाषण मिदम्:— ॥ १३२७ ॥

सलिच्छवि-कुलस्य नो ननु च बुद्धदेवो महान् ।
भवोदित-समोन्नते सितधरोन्नतोत्सङ्गके ॥
प्रत्क्तजनतन्त्रकःपुरुषवर्य-कल्याणवान् ।
समो हि रविणाऽजनिष्ट समवर्य-नेपालके ॥ १३२८ ॥

स्वयं च भगवानसौ ननु च तस्य देवस्य च ।
जने दिन-महा-महे सपदि चाऽऽगतो हं स्वतः ॥

भवज्जन-समक्षकं ननु च लब्ध-संभाषणोऽ ।
नुभूति रपि जायते निखिल-गौरवस्यैव मे ॥ १३२९ ॥

नेपालजस्य बृहतश्च तस्य जातो हि संदेशक एष दिव्यः ॥
सहस्रवर्षात्खलु विश्व एव द्वीपैसियावासिजनाश्च
तज्ज्ञाः ॥ १३३० ॥

सहस्रवर्षान् ननु पुण्य-संस्मृता वेतज्जयन्त्या गुरलक्ष-पर्व ॥
संमानतावज्जन-भव्यता श्रयत्संदेश एवं जनशान्तयेऽस्ति
॥ १३३१ ॥

नृणां गभीर-भृतश्रद्धताऽखिल-प्रावल्यकानां परिचायकं हि ॥
प्राक्पञ्चविंशाच्छत हायनाच्च संदेश-दानं विहितं हितेन
॥ १३३२ ॥

विश्वस्य भ्रातृत्व-शम-प्ररूपान् ।
मार्गान्तरालस्य च दिव्य-रूपान् ॥
संदेशकानद्य चकाल-निश्चितान् ।
उद्धारकाञ्चानुभवाम इत्थम् ॥ १३३३ ॥

अस्माकं पूर्व पुरुषाःस्वस्मिन् काले हि यावति ॥
विदधन्तःस्वानुभवाञ्चाऽभूवन् हि समागताः ॥१३३४॥

अद्याऽब्दाद्वै सहस्रात् सुगत-भगवतोनिर्वृतेर्हायनाच्च ॥
रूच्याःपूर्ण-प्रवृत्त्या ननु च गमयिता नृन परित्राण-पद्या।
तस्यैवंस्या न्महत्वं परम-भगवतः शान्ति-संदेशकस्य ।
ह्येतद्वाच्यं हृदय सरसिजे भावयामो नितान्तम् १३३५
विस्मृत्य क्षुद्रस्वार्थं सहन-रसवती भावनीयाःसतीःस्वा।
पारंपर्यं सद्योगं मधुर-गमनतःस्व मिथश्चोपचाय ॥

तस्यैवं क्षेत्रकस्य प्रचुरयणविधौ राष्ट्र-कल्याण-हेतो ।
रत्यन्त निश्चयेन भवति च विषयो जात-निर्माण-कायः
॥ १३३६ ॥

अन्योऽन्य द्वेषभावं सपरुष-वचना दुग्ररूप-प्ररूढं ।
मन्दं मन्दं च तेषां स्थिति रपि विदिता सर्वराष्ट्रैः क्रमां द्वय

मध्येराष्ट्रस्य मध्येऽस्थिरतर-विषयाद् भेदभावेन याते ।
संसारेऽन्ताद्भवेद्वै ह्यणुतर-वपुषःस्फोटनं विस्फुटस्य १३३७
मिथो मेलन-वैषम्याद् विद्वेषस्यो प्ररूपतः ॥
नराःप्रत्यर्थिणो नृणां गता निर्मातुमेव च ॥ १३३८ ॥

क्लि वस्तु—परिस्थितिज्ञतः ।
सुगतस्याखिल-भ्रातृ-दिव्यकम् ॥
समहत्वकमेव व्यञ्जितुं ।
ननु संदेश—समागतोऽस्त्ययम् ॥ १३३९ ॥

अतएव भवत्परिस्थितौ ।
भव-बन्धो श्च गिरोऽन्तरा पथाम् ॥
स्वदृशाच बृहत्तराऽऽकृतौ ।
ननु चाङ्गीकरणं विधेयकम् ॥ १३४० ॥

भगवत्सुगतस्य गीरियं ।
ननु जाते सुविशेष-हेतवे ॥
न च कंश्चिदयं हि बादकः ।
सुकृतोऽयं न पथीनति दृढः ॥ १३४१ ॥

अभिघातिपरारातिप्रत्यर्थिपरिपन्थिन इत्यमरः

जगतःसुखमेव शान्तिकं किल मत्वाऽऽदिम सर्गलक्षकम् ॥
अमुना सुखदायि निश्चितं कृतमासी त्प्रतिपादनं च तत् १३४२

नूनं सर्वजनेन बुद्ध-भगवद्दिव्यस्य संदेशकं ।
मत्वा धर्मत एक सर्व-शुभकृन्मूलं च सैद्धान्तिकम् ॥
कर्त्तव्यस्य परायणेन सुकृता त्प्रत्येकके क्षेत्रके ।
कार्येण प्रतिपादितुं सतिवले विश्वस्य कल्याणकम् १३४३

पञ्चविंश-शतमिताद् हायनात् पूर्वमेव हि ॥
जनित्वा बुद्धदेवेन युगो हि परिवर्त्तितः ॥ १३४४ ॥

बुद्धस्याऽऽद्य पुनश्च तद् भगवतःसंदेश-दिव्याद् वशात् ।
नो भूत्वा हि विशेष-जाति सुकृतिर्विश्वस्य भव्याऽऽवहा ॥
संसारस्यपरिस्थितौ शममयेवायौ च शान्त्या युते ।
ह्यस्मिन् तत्परिवर्त्तनस्य करणं कर्त्तव्य मेवाऽस्तिच १३४५

इद मतीव हि तुष्यति मे वचो ।
यदमहोऽद्य समस्त-विदेशके ॥
प्रचलिताऽस्ति न-खण्ड-महाव्यथा ।
भुवन-शान्ति-विधान-निमित्तका ॥ १३४६ ॥

च भवति दृढ-विश्वसनं हि यत् इयमहो खलु नैतिक शक्तिका ॥
विजयलब्धिमथो हि करिष्यति सुगततुल्य-महापुरुषस्य सा
॥ १३४६ ॥

एतस्यां बुद्धजयन्त्यां विशेषतो हि ध्यातव्यः ॥
तज्जीवाऽऽचरणक-विषयेऽपि हि विहितोऽस्ति
संदिष्टः ॥ १३४७॥

अस्या बुद्ध जयन्त्याःकृतकलितेऽस्मिन् समारोहे ॥
अस्माभिर्मननीयं भगवद् बुद्धस्य जीवनाऽऽचरणम् १३४८

एतद्विषयक-संदेशोऽसाधारणतोहि ध्यातव्यः ॥
तेन दृढीकृतमेतं ह्याचरणाच्छं सदैव भवितव्यम् १३४६

यावद् भवे दाचरणं न शुद्धकं तदाऽनुसारं न
सहेमहि कृतौ ॥

अतोहितस्याऽऽचरणस्य मान्यता-दानाऽनुसारस्य
वचोऽनिवार्यता ॥१३५०॥

भगवद्-बुद्ध-देवस्य जननं यत्रचाऽभवत् ॥
तदीय-भाग्य-सौभाग्या न्नेपालस्याऽस्ति गौरवम् ॥१३५१॥

संदेशं तं महान्तं चाऽक्षुण्णे रूपे सदर्हिते ॥
रद्वद्विशेष-यत्नेन लंकाया अस्ति मङ्गलम् ॥ १३५२ ॥

अमूः श्रीभद्भगवतो बुद्धस्य विविधाःकथा ॥
अमूल्या रत्न-सादृश्या विद्यन्ते हि प्रशस्तकाः ॥१३५३॥

अत्र लंका-प्रदेशेहि तासां सम्यक्तयाऽवनम् ॥
अत्रत्य-जनतानां च शान्ति-भ्रातृत्वयो र्द्वयोः ॥१३५४॥

इतिहासक-संवद्ध-पारंपार्य-समागता ॥
दीप्यमाना सती सेयं सोदाहरणताऽखिला ॥१३५५॥

संदेशं प्रहितुं प्रभोर्भगवतः श्रीवुद्ध-देवस्य च ।
सम्राजा खलु भारतस्य तनयाऽशोकेन नैजा प्रिया ॥
लंकायां प्रहिता स्वयं नृपतिना नेपालदेशेऽपि तद् ।
देशानां ननु मैत्रिकं हि विहितं संवन्ध मेतद् दृढम् १३५६

बिश्व-बौद्धस्य संजातं चतुर्थं मेलनं सताम् ॥
नेदीयस्समये जाते भारते सुगत-प्रभोः ॥१३५७॥
जयन्त्याहि समारोहोऽभवदत्र भवत्यपि ॥
शेषे तदीय एतस्मिन्नत्राऽस्माभि र्जनैरपि ॥ १३५८ ॥
पणो भवति कर्त्तव्यो यद् विश्वेशान्ति-हेतवे ॥
समस्तानां हि जीवानां शुद्धाऽऽचरण-भावनाम् १३५९॥
आदाय तं प्रति श्रद्धाञ्जलिमुद्भावयामहे ॥
शेषे "जयति श्रीलंका जय नेपाल" इत्यपि ॥१३६०॥

२०१३ संवत्सरे चैत्रस्य ७ दिने
बेलला वैटर-सरस्वती विशालगृहे हिन्दु धार्मिक-सांस्कृतिक संस्थाभि रायोजिते-संयुक्त-स्वागत-समारोहे लंकाया भूतपूर्व मन्त्रि-सर कान्थेयावति नाथनेन सर्व हिन्दूनां सकाशात् समर्पित-मानपत्रस्य प्रत्युत्तरे श्री ५ महाराजाऽधिराजेन प्रदत्तं भाषणम् :— ॥ १३६१ ॥

हे सज्जन-वृन्दक-योषितश्च ।
सभापते ? जात-महोदयाश्च ॥
भवैक-मात्रं निरवग्रहं च ।
पवित्र-हिन्दुत्व-निवास-जातम् ॥ १३६२॥

नेपाल-देशं प्रति नो भवद्भि ।
र्व्यक्ती कृतां स्वां हृदयैक-भक्तिम् ॥
संमानता मुच्च-समस्त-भावनां ।
वयं नितान्तं स्पृहयाम एवम् ॥ १३६४ ॥

युस्माकञ्च्छुभ-चिन्तनस्य वशाद्धार्दस्य सुस्वागतात् ।
हेतो र्वः प्रतिकुर्म्महे प्रकटनं सद्धन्यवादं वयम् ॥
एतत्सर्व-जनैःस्वतो हि विदितं हिन्दोश्च धर्म्म परं ।
हिन्दूनां सुकृतौ भवोत्थ-सुकृतावेकःसमस्तोत्तमः १३६५

विश्वस्मिञ्च्छमता भवस्य सुखता नृणां च सद्बन्धुता ।
निःसीम्नी हि मनस्विता सहनता ह्येवं विधा तत्वकाः ॥
वंहिष्ठाश्च भवन्ति य स्सुकृ[illegible] हिन्दुत्वकं स्थापितम् ।
चाऽक्षुण्णं ह्यविभाज्यकं च [illegible]हतं वर्षा [illegible]स्त्राऽधिकात्
॥ १३६६ ॥

हिन्दुत्वकाऽऽलंबन-तत्पराश्च ।
संमानयामो हि भवन्त मेनम् ॥
एकं वचोऽस्त्येव हि हिन्दुतायाः ।
महत्व-प्रामाण्य-यथेष्ट मस्ति ॥ १३६७ ॥

हिन्दुत्वस्याऽयं गुणो व्यापकोऽस्ति ।
हिन्दोःप्रत्येकं हि हेतो रदश्च ॥
वाच्यं ह्येकं गौरवेनाऽन्वितं च ।
धर्मस्यैवाऽक्षुण्णताऽऽपादनं च ॥ १३६८ ॥
एतत्कार्यं हिन्दुभि रेकशश्च ।
प्रत्नात् कालात् स्वैरि-नेपालकेन ॥
पारंपर्यां हिन्दु-धर्मस्य दीप्रा ।
ह्येतावन्तं संस्कृतिःस्थापिता सा ॥ १३६९ ॥

संसारेऽस्मिन् क्वचरा न कृता सा ।
एषोऽजस्रं वर्त्स्यते नः प्रयासः ॥

एतद्धर्मस्याऽभि वृद्धे र्महत्वं ।
पूतं ज्ञातं कुर्म्महे शक्य-यत्नम्।। १३७० ।।
विश्रम्भोऽयं विद्यते नोऽस्ति यच्च ।
ह्येतत्पूर्णं हिन्दवः साधयेयुः ।।
एतत्कर्त्तार श्च पुञ्ज-प्रयासं ।
"लंका नेपालौ जयेतां" ह्शेषे ।। १३७१ ।।

२०१३ विक्रम [illegible] रे चैत्र मासस्य ८ दिने लंकादेश-समु[illegible]मनात् [illegible]क् श्री ५ महाराजाऽधिराजेन लंका-वासि-जनानां नामभ्यःप्रदत्तो निर्गमन-संदेशः १३७२

प्रियालंकाऽऽवासाः ? महिमसहता व्छासक-जुषां ।
अमुष्याःलंकाया जनरल-पदै र्भूषणवताम् ।।
समाव्हाने हार्दे ह्यथ खलु समागत्य भवतां ।
नवाऽद्रा द्रम्येऽस्मिन् कृत-सुखद-संपूर्ण-भ्रमणाः १३७३
वयं गच्छन्तःस्मो, ननु सकल-देशोऽद्य भवता ।
कृतं यद्यद् धार्द स्व-सखिरसितं स्वागतमतः ।।
प्रभावोपेताःस्मो भवदति सत्कार-विधि भिः ।
न शक्ताःस्मः स्थातुं नहि विहित-संवर्णनतया ।।१३७४
शिष्टानां व्यवहारं वो हार्द-सौहार्द-भावनाम् ।।
न तितिक्षामहे स्थातुं न कृत्वा वर्णनां पराम् ।।१३७५।।
अत्र नोऽव स्थितिं मञ्जुं तथा च सुख-दायिनीम् ।।
कर्त्तुं भव त्सर्वकारात् प्रबन्धाऽखिलहेतवे ।।१३७६।।
आयातेभ्यो मया सार्द्धं मत्तो नश्च सकाशतः ।।
महामहिष्या, हार्दन्तान् ज्ञापये धन्यवादकान् ।।१३७७।।

संख्या वासर मेव यद्यपि वयं देशे स्थिता मञ्जुले ।
ह्ये तत्संभ्रमणेऽवलोकित मपि स्वंमित्रता-स्वागतम् ॥
एतत्सर्व-निज-कृताऽनुभवकं संपत्स्यतेऽवश्यकम् ।
अस्माकं खलु हेतवे हि नितरां स्मर्त्तव्य मेतच्चिरम् १३७८

अस्माकं भ्रमणस्य लेश-समये सत्वेऽपि यावच्च यत् ।
यौष्माकीण-जनस्य संस्तु... यौष्माक-देशे स्वतः ॥
नेत्र-प्राघुणकं वयं ह्यकरुम ... द्वि-देश... च ।
तुल्यं ज्ञात मतोमिथः कति सुहृद्-दाढ्योऽनुभूतिःकृता
॥ १३७९ ॥

विश्रान्तानां शमनाय वान्धवकृते ह्यायासयन्तौ चद्वौ ।
देशौस्तःकृषिमुख्यकौ परिचितौ नो दीर्घकालेन हि ॥
स्वं स्वं देशक मुन्नय त्कृतितति मुद्वेलयन्तौ त्वरा ।
वर्त्तेते कतिवद्धकौ दृढतरौ कर्मैक-लग्नौ भृशम् १३८०

एतस्मिन् भ्रमणेऽपि पथ्यकतमा श्रीमत्सकाशादपि ।
विज्ञेया हिमिथःस्वकीय-विषयोऽस्माभिःसमालक्षिता ॥
अन्योऽन्यं सहयोग-बुद्धिविचरद्दानं समादानकं ।
ह्यत्यन्तं फलवत्समेष्यति च नो निर्धार्यते धारणा १३८१

युस्माकं सर्वतो नोद्रुत तर-गतिभिःकासयन्तं स्वदेशं ।
वीक्ष्याऽस्माकं प्रजाता ननु निजमनसि प्रीति रस्ति
प्रपूर्णा ॥

देशोन्नत्यै प्रयत्नात्स्थिरतर-मनसा वर्णनीयैकताभिः ।
रम्यं वो देशएवं झटिति तर-गतेःसर्व-संपत्ससमृद्धः १३८२

संपत्स्ये ताऽलधीयानितिमनसि दृढो जातविश्वासकोनः।
अस्मिन् कृत्ये सदैवं महति हि भवतां स्वीय-देशोन्नतिश्च ॥
प्राप्ति भूयात्प्रपूर्णा फलवती सततं नः शुभेच्छा भवत्सु।
"श्रीलंका देश एवं जयतु, जय तथा देश नेपाल"
इत्थम् ॥ १३८३ ॥

समापितो भा[illegible] भाषणानाञ्च संग्रहे ॥
यच्छ्री-[illegible]-महारा[illegible]ऽधिराजानां सुधा-गिराम् १३८४
इदं पवित्रं परमं महेन्द्र–नृपाल-संकीर्त्तित-वाक्य-पुञ्जम् ॥
य एन माकर्ण्य सदाऽनुकीर्त्तयेद् धुनोत्यघान् भूपति
शिक्षणात्सः ॥ १३८५ ॥

२०११।२०१२।२०१३ वैक्रम संवत्सराणां

श्री ५ महाराजाऽधिराजानां महेन्द्र वीरविक्रम शाह देवानां वदन–सरसीरुहान्निसृष्टाणां घोषणानां भाषणानां तथा प्रहितानां संदेशाना ममर–वचसां च सङ्ग्रह–ग्रन्थमेतत्:–
॥ १३८६ ॥

एको भागः समाप्तः

सर्वोन्नताऽखिल–सु-सभ्यक–देश–चारी ।
प्राप्ताऽवबोध–नयपालक–भार–हारी– ॥
श्रीपञ्च-युक्तक–महेन्द्र–नरेन्द्र–धीरः ।
साक्षात् महेन्द्र–गुण–संहतिताऽवतारः ॥१३८७॥

कृत्वा तदीय-वचनानि मनोगता[illegible] ।
कृत्वा च तानि ननु कर्णपुटे ग[illegible]त ॥
गीर्वाण-गद्य-मय-पद्यमये च क[illegible] ।
व्युद्घाटन-प्रविहितस्य च भाग[illegible]ः ॥ १३८८ ॥

कल्पितः कतिमया [illegible]ो नो ।
जल्पितं नृपतिना [illegible]विहाय ॥
यस्तु बोध-कर[illegible] ।
कुत्र कुत्र पुनरावृ[illegible] मेव ॥ १३८९ ॥

अस्माकं महीन्द्रदेवानामिव महेन्द्र देवानां श्री ५ महाराजाऽधिराजानां विद्याऽनुरागित्वेन सर्वत्र विद्या-प्रचाराय निगूढ-तत्वाऽवगमत्वं पर्यवेक्ष्य प्रतिपाद्य-विषय मवलम्ब्य भाषितानां भाषणानां सार गर्भित्वं, तथा नेपाल देशं पञ्चायत-प्रजातन्त्र-प्रवर्धनेन प्रगुण-गुण-भरितं समुज्ज्वलीकर्त्तु स्व-हृदयैक तानत्वं समीक्ष्य ग्रंथकारो राज्ञा जय नेपाल इत्युदीरितं समस्या-पूर्त्ति-रूपेण प्रपूरयन् पद्यैः स्तवीतिः-
॥ १३९० ॥

यथाः—

संबोध्य स्वीय-जनता प्रति भाषमाणो ।
नेपाल-देश-जन-पालन-तत्परस्वः ॥
राजाऽधिराज-महनीय-महेन्द्र-देवो ।
नेपाल देश ! जय चेत्थ मभाषतान्ते ॥ १३९१॥

विद्वत्समाज-परिजुष्ट-समस्त-शिक्षां ।
नेपाल-देश मभितो विततां प्रकुर्वन् ।।
श्री महेन्द्र नरपो ह्यनवद्य-विद्यः ।
"नेपाल देश ? जय" चेत्थ म बोचताऽन्ते ।।१३६२।।

अज्ञानताऽन्धतमस … कलान् निरस्यन् ।
निःशुल्क-शिक्षण- … न-सन्द्रतस्थः ।।
तत्वन्न स्वदेशम … सर्व-शिक्षां ।
"नेपाल देश जय … मजजल्तोऽन्ते ।। १३६३ ।।

रक्षाकृतेऽनुसृत-सुकृत-मार्ग-सेतो ।
दुर्वृत्त-नाशन-सुवृत्त-सुखस्य हेतोः ।।
जाताऽवतार-निजसज्जित-सर्व-चेष्टो ।।
"नेपाल देश जय" चेत्थ मचष्ट भूपः ।। १३६४ ।।

राष्ट्रस्य-संस्कृति-परंपरयै धयन् यः ।
पञ्चायतस्य प्रथया प्रथितं व्यधत्त ।।
राष्ट्र-स्वतन्त्र-जन-भावन-राष्ट्रिय-श्रीः ।
"नेपाल देश जय" चेत्थमवीवदुत्सः ।। १३६५ ।।

विद्वज्जना नभि प्रार्थना

इत्थं राजाऽधिराजस्य श्री महेन्द्र-प्रभोः सतः ।।
मुखाम्भोज-विसृष्टाणां पीयुष-मधुरं वचः ।। १३६६ ।।
नाऽमूलं लिखितं किञ्चिद् दिङ्मात्र मिह दर्शितम् ।।
संस्कृत-प्रेमिणा मर्थे कुत्रचिदस्ति त्रिवरतिः ।। १३६७ ।।

अस्यां कृतौ मे न कवे भवेयु स्त्रुटयो यदि ॥
तत्क्षन्तव्यं सुधीवृन्दैः क्षमास्यादद्‌ष सी ॥ १३९८ ॥

भूम्ना राज्ञां भाषणाना ते हर्षा कृत ॥
ग्रंथकर्त्रा स्वतो मूलं धितं नृप ॥ १३९९ ॥

दृग्गोचरीकर्त्तु म दोषता ।
स्वकीय-मुद्रापक दूष्यता ॥
अत्रैनयो र्मेलन वकृति ।
ापद्यते चेत् सुधिया भिषज्यताम् ॥ १४०० ॥

नागस्य वर्णोऽपि न लब्ध इत्यपि ।
स्वधातु-वैषम्यज-यन्त्र-रुगिति ॥
जातु प्रजातो मम मुद्रणाऽऽलये ।
तत्कर्त्तृ लोकै र्वचनै ररुन्तुदैः ॥ ॥

विद्धेऽप्यसौ मुद्रित एष कुत्र ।
क्षमध्व मेतत् सुधियःकृपाभिः ॥
चिकित्सकस्येति कृतिःसलीलं ।
प्रोत्साहयध्वं गुण-मात्र-भाजः ॥ १४०१ ॥

श्री ५ महाराजा[illegible]राज-महेन्द्र-वीर-विक्रम-शाहदेव-प्रभूणां
संस्कृत-[illegible]ानुरागिणां करकमलेषु

सादरं

नत-मौलि[illegible]ा [illegible]ऽञ्ज[illegible] कविराज हेमन्तराम भट्टराई
त्युपाव्हे[illegible] सम[illegible]तोऽऽ[illegible] महेन्द्र-चम्पूः— ॥ १ ॥

राजन् ? तव क[illegible] वाङ्मनो-गोचरा सती ॥
माद्दशेन [illegible]न्दा[illegible] खतुं नक्षमाऽऽवहा ॥ २ ॥
तथापि तव कारुण्य- लिप्सा-जात-धृतोद्यमः ॥
समापितं भाग महत्तुभ्यं राजन् ? समर्पये ॥ ३ ॥
गृहाणोऽनुगृहाण कृपायुक्ताऽवलोकनैः ॥
येनाऽहं संस्कृत-प्रेम्णां भवेयं भत्यभाग्जनुः ॥ ४ ॥

संस्कृत-प्रेमि-

श्री ५ महाराजाधिराजस्य
प्रजा-जनो

लेखकः—

अध्यापक कविराज हेमन्तराम भट्टराई
श्री ५ को सरकार आयुर्वेद विद्यालय तथा
चिकित्सालय

२०२४।६।१ गते
संविधान दिवसे

मुद्रा-कर-दोषात्तथा ममदृष्टे रप्टुतया जाताऽ शुद्धि-दोषान् संशोधयन्तु शुद्धि[पत्र]-निरो[क्षकाः] विद्वांसः

अशुद्धि	शुद्धि	पत्र नं.	अशुद्धि	शुद्धि	गद्य श्लोक नं.
महनी	महनीय	ङ		ऽ	१००.
न्य	न्ये	४		ह्यद्या	१०६
स्व	स्वं	५		र्मि	११७
महा	महो	५	दुर्व	दुर्व	१३१
		गद्य श्लोके			
मात	मातृ	२३	संस्थामि	संस्थाभि	१४७
चहाराजा	महाराजा	३५	यन्तो	यत्नो	१४९
आमूल	आमूलं	४८	ध्रुर्व	ध्रुवं	१५२
मूर्च्छति	मृच्छति	५६	सर्वै	सर्वैः	१५५
स्थान्	स्थाः	६२	तल्मराडल	तन्मराडल	१५६
ट्	टूँ	७	यथ	यथा	१५६
त्मृति	स्मृति	७६	स्तन्धत्वं	स्तब्धत्वं	१५९
ण	णे	७७	ध्ययनं	ध्यनं	१६२
क्तां	क्ता	७७	पर्यक्त	पर्युक्त	१६५
भरित	भरित	७८	जनैस्तया	जनैस्तथ	१६५
हें	हैं	८२	चित्त	चिन्त	१६७
खिलम	खिलम्	८२	उपथिता	उपस्थित	१७३
सन्तोषेन	सन्तोषेण	८[illegible]	रसशि	राशि	१८८

त्रिधास्थ	विधा[illegible]
स्थेयं	स्थेयं[illegible]
प्रस्य:	पु[illegible]
संघाटता	स[illegible]टि[illegible]
मव	[illegible]
परहेतवे	धीरहेतवे
राक्यते	शक्यते
भायना	भावना
तव्वा	तव्या
स्थाद्र	स्याद्र
न्त्वेपु	न्त्वेपु
ताहक	ताहक्
थया	यया
वसिनां	वासिनां
न्युप	त्युप
स्व च	स्वं च
नत्तु	नन्तु
स्च	स्व
स्मृ	स्मृ
[illegible]वल	सूर्वल
[illegible]दातुं	प्रदातुम्
एथं	एवं
यन्तो	यत्नो

श्लोके	गद्ये	गद्ये	श्लोके
१६१	पंच	पंच	२४६
१६३	दित्ता	दिच्छा	२५६
१[illegible]	सत्त्य	सन्त्य	२६३
१[illegible]	याव	भाव	२६४
[illegible]	एवं	एव	२६४
[illegible]	नपति	नृपति	२७६
[illegible]	प्रभति	प्रभृति	२८१
[illegible]	स्वर्गः	स्वर्गः	२८२
२१६	विद्य	विघ	२८५
२१८	लधि	लवि	२८६
२२०	पूर्णा	पूर्णा	२६५
२२२	सरख्ये	संख्ये	२६७
२२५	ग्रूपे	ग्रूपे	२६७
२३०	मर्ष	सर्प	३२०
२३२	पञ्च	पञ्च	२३५
२३३	श्रित	श्रितो	२७६
२३३	सक्त	सक	२८७
२३३	मुना	ह्यमुना	३०७
२३७	लपि	लेपि	४१८
२३८	वहितं	विहित	४१८
२३९	लखिमा	लेखिता	४१८
२४०	राप	रपि	४१८
२४४	दर्शिचता	दर्शिता	४२३

		श्लोके गद्ये			श्लोके गद्ये
सुत	सुतरा	४२७	गन्तव्मे	गन्तव्यमे	६८७
मूर्जु	मूर्जं	४३८	सव	[illegible]र्व	७४८
प्रयज	श्रयज्	४४०	प्रतियोगित	[illegible]तियोगिता	७५२
स्वय	स्वयं	४४१	[illegible]	[illegible]मर	७५२
पथ्वी	पृथ्वी	४४६	[illegible]र्यियन्ते	[illegible]तर्म[illegible]न्ते	७५२
रपियय	द्रु तमपि	४६०	[illegible]	[illegible]व[illegible]	७६६
विषवे	विषये	४६०	[illegible]	[illegible]ुभ	७८५
निसग	निसर्ग	५३१	[illegible]	[illegible]ीति	७८७
स्वास्थ्य	स्वास्थ्यं	५३५	साख	सखि	८१८
वंत्यै	वृंत्यै	५४६	खात्मा	[illegible]त्मा	८२१
ध्येय	ध्येयं	५४९	शाकथते	शक्यते	८३६
सघ	संघ	५५२	द्वथे	द्वये	९६२
सि	मित्र	५६२	महत्व	महत्व	८८१
भवः	भव्यं	५६२	समेयं	समेय	८८३
हार्दिकिं	हार्दिकीं	५६४	अम्यस्य	अभ्यस्य	८०३
समपित	समर्पित	५७८	बुसुत्सित्त	बुभुत्सित्ता	९९८
एकात्रिता	एकत्रिता	६०३	विशल	विशाल	९२८
सवेयु	- भवेयु	६०८	दीर्वायुप	दीर्घायुषा	९७३
चक्र	चंक्र	६०९	जुपे	जुषे	९७४
समस्तमू	समस्तम्	६१०	चर्कर्त्ति	चर्कर्त्ति	९८१
विवार	विचार	६१३	प्रकाश	प्रकाशं	९८२
तोपण	तोषण	६२८	व्यन्नितुम्	व्यञ्जितुम्	१०४०
सम्पूक	सम्पर्क	६५[illegible]	शूभ्	शूभ्	१०४६

		श्लोके गद्ये			श्लोके गद्ये
पीत्य	पीत्थ[illegible]	१०५१	सहिया	सहिता	१२१६
इष्यु	इत्यु[illegible]	१०६६	साफल्यंने	साफल्यंनो	१२२३
स्सभर	[illegible]भर	१०[illegible]	षुरस्थे	पुरस्थे	१२४६
धिय	[illegible]या	११[illegible]	प्रमवति	प्रभवति	१२६५
धुलिखेलकस्थ	धुलि[illegible]लकस्य	[illegible]	साधरणतो	साधारणतो	१३४६
नीपञ्च	[illegible]प[illegible]	[illegible]	सहख्रा	सहस्रा	१२६६
मधिकं	अधि[illegible]	[illegible]	लघीय	लघीया	१३८३
मवि	मविरत	[illegible]	राष्ट्रं	राष्ट्र	१३६५
रतं	भिक्ने	११६२	त्रिवसृति	विस्तृतिः	१३६७
श्रद्धवा	श्रद्धया	११७८	हृषा	हर्षा	१३६६
समस्तां	समस्तं	१२००			

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

मातृभूमि प्रेस, काठमाडौं।